# २८ यदि - तर्हि, चेत्, नो चेत्

मिलिन्दः - आगामिमासस्य कार्यक्रमस्य विषये चिन्तनम् एव न कृतम् । यदि एवम् एव दिनानि गच्छन्ति तर्हि ......

सुन्दरः - मित्र ! चिन्ता मास्तु । **यदि** वयं सर्वे कार्याणि विभज्य स्वीकरिष्यामः **तर्हि** न कोऽपि क्लेशः भवेत् ।

मिलिन्दः - **यदि** अस्माकं गोष्ठी भविष्यति **तर्हि** खलु कार्यविभागः ?

सुन्दरः - अस्तु मित्र ! अद्यैव गोष्ठी भवतु । आगच्छामि तावत् । **यदि** कार्यालयं विलम्बेन गच्छामि **तर्हि** मम अधिकारी तर्जयिष्यति ।

मिलिन्दः - सायं मम गृहम् आगमिष्यति खलु भवान् ?

सुन्दरः - शक्यं **चेत्** सायम् आगमिष्यामि । **नो चेत्** दूरवाणीं करिष्यामि ।

मिलिन्दः - शक्यं **चेत्** इति ।

सुन्दरः - आम् । अद्य गणनापरिशोधकः अस्मत्कार्यालयम् आगतः अस्ति । सः प्रायः चतुर्वादने गमिष्यति । सः गमिष्यति **चेत्** अहं भवतः गृहम् अवश्यम् आगमिष्यामि । **नो चेत्** .....

मिलिन्दः - भोः, कार्यक्रमस्वरूपविषये अद्यैव निर्णेतव्यम् अस्माभिः ।

सुन्दरः - शक्यं **चेत्** सायं मिलाम । **नो चेत्** श्वः प्रातः मिलाम ।

मिलिन्दः - श्वः अरविन्दस्य समयः न भवति **चेत्** ।

सुन्दरः - **तर्हि** अद्य रात्रौ अहम् अरविन्दस्य गृहं गमिष्यामि ।

मिलिन्दः - सः गृहे भविष्यति **चेत्** समीचीनम् । **नो चेत्** . . . ?

सुन्दरः - **नो चेत्** उषसि पुनः गमिष्यामि । चिन्ता मास्तु भवतः ।

## विशेषः

### * यदि - तर्हि

'यदि समयः अस्ति तर्हि अहम् आगच्छामि' इत्यस्मिन् वाक्ये भागद्वयम् अस्ति -

१. समयः अस्ति । - **कारणवाक्यम्**

२. अहम् आगच्छामि । - **कार्यवाक्यम्**

एवं वाक्ययोः कार्यकारणभावः यदा भवति तदा 'यदि - तर्हि' इत्येतत् उपयुज्यते ।

'यदि' इति यत्र उपयोगः क्रियते तत्र 'तर्हि' इत्यपि उपयोक्तव्यम् एव । केवलस्य 'यदि' इत्यस्य प्रयोगः नास्ति ।

### * चेत्

'यदि तर्हि' इति पदद्वयं यस्मिन् अर्थे उपयुज्यते तस्मिन् एव अर्थे 'चेत्' इत्यस्य अपि उपयोगः भवितुम् अर्हति ।

उदा - समयः अस्ति चेत् अहम् आगच्छामि ।

(यदि समयः अस्ति तर्हि अहम् आगच्छामि इत्यर्थः ।)

'यदि - तर्हि' 'चेत्' इत्येतयोः अर्थः समानः इत्यतः 'यदि - तर्हि' इति यत्र प्रयुक्तं तस्मिन् वाक्ये 'चेत्' इति न प्रयोक्तव्यम् ।

उदा - यदि समयः अस्ति चेत् तर्हि अहम् आगच्छामि इत्येतत् वाक्यम् अशुद्धम् । यतः 'चेत्' इति यत्र अस्ति तत्र यदि इत्यपि प्रयुक्तम् ।

**अभ्यासः - १३**

अधः शब्दद्वयं निर्दिष्टम् अस्ति । पूर्वार्धे प्रथमशब्दम्, उत्तरार्धे द्वितीयशब्दं च प्रयुज्य 'यदि - तर्हि'युक्तानि वाक्यानि लिखत ।

| |
|---|
| उदा - निद्रा - शयनम् <br> यदि निद्रा आगच्छति तर्हि भवान् शयनं करोतु । |

१. ज्वरः - औषधम्

......... अस्ति ......... भवान् ......... ......... ......... ।

२. बुभुक्षा - भोजनम्

.......... .......... .......... .......... .......... ।

३. पिपासा - जलम्

.......... .......... .......... .......... .......... ।

४. दृष्टिदोषः - उपनेत्रम्

.......... .......... .......... .......... .......... ।

५. धनम् - उद्योगः

......... आवश्यकं ......... ......... ......... ......... ।

६. शान्तिः - आश्रमः

.......... .......... .......... .......... .......... ।

७. क्षीरम् - क्षीरकेन्द्रम्

.......... .......... .......... .......... .......... ।

८. कार्यसिद्धिः - परिश्रमः

.......... .......... .......... .......... .......... ।

९. चाकलेहः - आपणः

.......... .......... .......... .......... .......... ।

१०. तृप्तिः - समाजसेवा

.......... .......... .......... .......... .......... ।

**अभ्यासः - १४**

समीरः शय्यादिवस्त्राणि भाटकार्थं ददाति । भाटकविवरणं तु -

| वस्तुनाम | दिनस्य | दिनद्वयस्य | दिनत्रयस्य |
|---|---|---|---|
| शय्या | ४.०० | ७.०० | १०.०० |
| वस्त्रकटः | ५.०० | ९.०० | १२.०० |
| उपधानम् | २.०० | ४.०० | ५.०० |
| आच्छादकम् | १.०० | २.०० | ३.०० |

उपरितनविवरणस्य आधारेण किं वस्तु कति दिनानि नीतं चेत् कियत् दातव्यम् इति 'यदि - तर्हि'युक्तेन वाक्येन लिखत ।

| |
|---|
| उदा - यदि शय्या एकं दिनं नीयते तर्हि भाटकं चत्वारि रूप्यकाणि । |

१. ........ शय्या दिनद्वयं नीयते .......... भाटकं ............... ।

२. ........ शय्या .................. भाटकं ............... ।

३. ........ वस्त्रकटः ...................................... ।

४. ........ वस्त्रकटः ...................................... ।

५. ........ वस्त्रकटः ...................................... ।

६. ........ उपधानम् ...................................... ।

७. ........ उपधानम् ...................................... ।

८. ........ उपधानम् ...................................... ।

९. ........ आच्छादकम् ...................................... ।

१०. ........ आच्छादकम् ...................................... ।

११. ........ आच्छादकम् ...................................... ।

**अभ्यासः - १४**

अधः एकैकेन वाक्येन एकैकः प्रसङ्गः निर्दिष्टः अस्ति । तत्तत्प्रसङ्गे भवन्तः किं कुर्वन्ति इति 'चेत्'युक्तेन वाक्येन लिखन्तु ।

| |
|---|
| उदा - कार्यालयस्य विरामः भवति ।<br>कार्यालयस्य विरामः भवति चेत् अहं गृहं गच्छामि । |

१. गृहे कोऽपि नास्ति ।

........................................................................ ।

२. कोषे धनं नास्ति ।

........................................................................ ।

३. गृहम् अतिथिः आगच्छति ।

........................................................................ ।

४. बालकाः कोलाहलं कुर्वन्ति ।

........................................................................ ।

५. नगरयानानि न सञ्चरन्ति ।

........................................................................ ।

६. स्यूतः नष्टः भवति ।

........................................................................ ।

७. अधिकारी तर्जयति ।

........................................................................ ।

८. चोराः आगच्छन्ति ।

........................................................................ ।

९. पाके रुचिः न भवति ।

........................................................................ ।

१०. रात्रौ निद्रा न आगच्छति ।

........................................................................ ।

**अभ्यासः १६**

अधस्तनेषु वाक्येषु स्थितानि रिक्तस्थानानि 'चेत्, नो-चेत्, यदि-तर्हि' इत्येतेषु केनचित् पदेन पूरयत ।

| | |
|---|---|
| उदा - | भवान् शीघ्रम् आगच्छतु । ............. पिता तर्जयति । |
| | भवान् शीघ्रम् आगच्छतु । **नो चेत्** पिता तर्जयति । |

१. भवान् औषधं स्वीकरोतु ..................... ज्वरः वर्धते ।

२. इच्छा अस्ति ....................भोजनं करोतु ।

३. ....... अध्यापकः अस्ति ......... कक्ष्यायाम् उपविशामि ।

४. ......... भवान् मधुरं खादति .... दन्ताः नश्यन्ति ।

५. ...... भवान् असत्यं वदति ....... कः भवति विश्वासं करोति ?

६. परश्वः भवतः गृहम् आगमिष्यामि । ................ प्रपरश्वः ।

७. सम्यक् पठ । ....... उत्तीर्णता कथं प्राप्यते ?

८. सुरेशः आगच्छति ................ भवान् माम् आह्वयतु ।

९. ..... दैवम् अनुकूलकरं नास्ति ......... कः किं वा कुर्यात् ?

१०. भवती उपविश्य पठतु ।................ उत्थाय वा पठतु ।

११. वृष्टिः आगच्छति ........... मयूराः नृत्यन्ति ।

१२. समयः अस्ति .......... भवान् आगच्छतु । ......... अनुजं प्रेषयतु ।

१३. ............ यानं शीघ्रं प्राप्यते ............ पञ्चवादने आगच्छामि ।

१४. अये, भवती विना शब्दं पठतु । ................ इतः निर्गच्छतु ।

१५. .......... देशभक्तिः अस्ति, .......... कर्तव्यप्रज्ञा अस्ति, तर्हि भवान् समाजसेवां करोतु ।